ङीप् । ३परपुरुषचतुष्कगामिन्यां स्त्रियां च । "नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत । अतःपरं स्वैरिणी स्यात् बन्धकी पञ्चमे भवेत्" भा० आ० १२२अ० ।

**स्वोपार्जित** त्रि० स्वेन उपार्जितम् । स्वयमर्जिते धनादौ । तस्य विभागो दायभागे दर्शितो यथा "सम्प्रति विभाज्यमविभाज्यञ्चोच्यते । तत्र कात्यायनः "पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्जितम् । दायादानां विभागे तु सर्वमेतद्विभज्यते" । "यच्चान्यदिति चकारः स्वयमित्यनेन संबध्यते स्वयञ्चार्जितमिति चकारादन्यस्यापि तदर्जनं साधारणधनद्वारेणेत्यर्थः । अनुपघातोपात्तमविभाज्यमाह स्मृतिमनुविष्णू "अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् । स्वयमीहितलब्धं तन्नाकामो दातुमर्हति" । पितृद्रव्योपघाताभावेन द्रव्यद्वारेण नेतरेषां व्यापारः, स्वचेष्टालब्धत्वेन शारीरोऽपि व्यापारो नेतरेषामिति अर्जकस्यैव तदसाधारणं स्वयमीहितलब्धं तदिति हेतुत्वेनोपन्यासात् । तथा च व्यासः "अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति, यद्धनम् । दायादेभ्यो न तद्दद्याद्विद्यालब्धन्तु यद्भवेत्" । स्वशक्तिमात्रेण यत् प्राप्तमिति सामान्येनाभिधानात् सर्वमेवंविधं स्वीयमसाधारणं द्रष्टव्यम् । स्वशक्तिप्राप्तस्यापि विद्याधनस्य समाधिकविद्यैः साधारणत्वात् न्यूनविद्याविद्यनिराकरणार्थं विद्यालब्धपदम् । तथा याज्ञवल्क्यः "पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम् । मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्" । मैत्रादिग्रहणं प्रदर्शनार्थं, एवमादिषु प्रायेणानुपघातसम्भवात् । तथा मनुः "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत् । मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च" । तथा व्यासः "विद्याप्राप्तं शौर्य्यधनं यच्च सौदायिकं भवेत् । विभागकाले तत्तस्य नान्वेष्टव्यं स्वरिक्थिभिः" । पितृपितृव्यादिभ्यः सुदायसम्बन्धिभ्यः प्रसादादिना लब्धं सौदायिकम् । तथा नारदः "शौर्य्यभार्य्याधने, हित्वा, यच्च विद्याधनं भवेत् त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः" । भार्य्याप्राप्तिकाले लब्धं भार्य्याधनम् औद्वाहिकमित्यर्थः, एतानि वर्जयित्वा अन्यद्विभजेदित्यनुवर्त्तते वाक्यान्तरीयम् । रुद्रधरादिभिः शौर्य्यादिधनस्त्वमविभाज्यत्वे कारणं नोच्यते शौर्य्याद्यर्जितस्यापि विभागस्मृतेः । तथा च व्यासः "साधारणं समाश्रित्य यत् किञ्चिद्वाहनायुधम् । शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः । तस्य भागद्वयं देयं शेषास्तु समभागिनः । साधारणद्रव्येणार्जितस्य धनस्य विभागं वदति । तथा नारदः "कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः । भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्" । बिभृयादित्येकवचननिर्देशात् यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्योपार्जितधने तस्याप्यधिकारः । तथा "वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात् । पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्" । पित्र्यपदं साधारणधनपरं तदनाश्रित्यार्जितं वैद्योऽविद्याय अनिच्छन् दद्यात् वैद्याय विदुषे पुनः साधारणमन्तरेणाप्यर्जितं दद्यादेव । तथा च गौतमः "स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्" । असाधारणधनशरीरव्यापारार्जितं स्वयमर्जितं अविद्वद्भ्यो दातुमनिच्छन् न दद्यात् विद्वद्भ्यः पुनर्दद्यादेव । एतच्च विद्याधनमात्रविषयम् । तदाह कात्यायनः "नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् । समविद्याधिकानान्तु देयं वैद्येन तद्धनम्" । तन्त्रोच्चरितविद्यापदम् उभाभ्यां समाधिकपदाभ्यां संबध्यते तेन समविद्याधिकविद्यानां दातव्यं न्यूनविद्याविद्ययोः पुनरनधिकारः । "तदेवमादिवचनैर्विद्याशौर्य्यादिधनेष्वपि साधारणधनोपघातानुपघाताभ्यां विभागाविभागयोरवगमात् तस्यैव प्रयोजकत्वात् तत्पदवत्त्वेव स्मृतिः कल्पनीया, उपघातार्जितं विभजेदिति, न पुनः शौर्य्यादिपदवत्त्वपि, अवश्यकल्पनीयसामान्यस्मृतिकल्पनयैवोपपत्तेः । छोलाकाधिकरणन्यायस्यायमेव विषयः । यद्वा न्यायप्राप्त एवायमर्थः, यद्धि येनार्जितं तत् तस्मिन् जीवति तस्यैव, असति विशेषवचने, यत्र पुनः साधारणधनमात्रेणैकस्य व्यापारोऽपरस्य धनशरीराभ्यां तत्रैकस्यैको भागोऽपरस्य भागद्वयं न्यायावगतमेवं सिद्धम् । एतेन चैतदपि सिध्यति, यत् साधारणधनोपघाते सति यस्य यावतोऽंशस्य स्वल्पस्य महतो वोपघातः, तस्य तदनुसारेण भागकल्पना कार्य्या । किञ्च कात्यायनवचनम् "विभक्ताः पितृवित्ताच्चेदेकत्र प्रतिवासिनः । विभजेयुः पुनर्द्व्यंशं स लभेतोदयो यतः" ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते वाचस्पत्ये सकारादिशब्दार्थसङ्कलनम् ।